# Shri BhavAni Sahasranamastotram

# શ્રીભવાનીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : durlabha bhavAnI kavacha ma.ntra sahasranAma stotra

File name : bhavaaniisahasra.itx

Category : sahasranAma, devii, pArvatI, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com.com

Description-comments : rUdrayAmala_ta.ntra

Latest update : August 22, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

January 10, 2025

*sanskritdocuments.org*

# શ્રીભવાનીસહસ્રનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
કૈલાસ શિખરે રમ્યે દેવદેવં મહેશ્વરમ્ ।
ધ્યાનોપરતમાસીનં પ્રસન્નમુખપઙ્કજમ્ ॥ ૧॥

સુરાસુરશિરોરત્નરઞ્જિતાઙ્ઘ્રિયુગં પ્રભુમ્ ।
પ્રણમ્ય શિરસા નન્દી બદ્ધાઞ્જલિરભાષત ॥ ૨॥

શ્રીનન્દિકેશ્વર ઉવાચ ।
દેવદેવ જગન્નાથ સંશયોઽસ્તિ મહાન્મમ ।
રહસ્યમેકમિચ્છામિ પ્રષ્ટું ત્વાં ભક્તવત્સલ ॥ ૩॥

દેવતાયાસ્ત્વયા કસ્યાઃ સ્તોત્રમેતદ્દિવાનિશમ્ ।
પઠ્યતે નિરતં નાથ ત્વત્તઃ કિમપરં મહત્ ॥ ૪॥

ઇતિ પૃષ્ટસ્તદા દેવો નન્દિકેન જગદ્ગુરુઃ ।
પ્રોવાચ ભગવાનીશો વિકસન્નેત્રપઙ્કજઃ ॥ ૫॥

ઈશ્વર ઉવાચ ।
સાધુ સાધુ ગુણશ્રેષ્ઠ પૃષ્ટવાનસિ માં ચ યત્ ।
સ્કન્દસ્યાપિ ચ યદ્ગોપ્યં રહસ્યં કથયામિ તત્ ॥ ૬॥

પુરા કલ્પક્ષયે લોકાન્સિસૃક્ષુર્મૂઢચેતનઃ ।
ગુણત્રયમયી શક્તિર્મૂલપ્રકૃતિસંજ્ઞિતા ॥ ૭॥

તસ્યામહં સમુત્પન્નસ્તત્વૈસ્તૈર્મહદાદિભિઃ ।
ચેતનેતિ તતઃ શક્તિર્માં કાપ્યાલિઙ્ગ્ય તસ્થુષી ॥ ૮॥

હેતુસ્સઙ્કલ્પજાલસ્ય મનોધિષ્ઠાયિની શુભા ।
ઇચ્છેતિ પરમા શક્તિરુન્મિલતિ તતઃ પરમ્ ॥ ૯॥

તતો વાગિતિ વિખ્યાતા શક્તિઃ શબ્દમયી પુરા ।

પ્રાદુરાસીજ્જગન્માતા વેદમાતા સરસ્વતી ॥ ૧૦॥

બ્રાહ્મી ચ વૈષ્ણવી સૈન્દ્રી કૌમારી પાર્વતી શિવા ।
સિદ્ધિદા બુદ્ધિદા શાન્તા સર્વમઙ્ગલદાયિની ॥ ૧૧॥

તયૈતત્સૃજ્યતે વિશ્વમનાધારં ચ ધાર્યતે ।
તયૈતત્પાલ્યતે સર્વં તસ્યામેવ પ્રલીયતે ॥ ૧૨॥

અર્ચિતા પ્રણતા ધ્યાતા સર્વભાવવિનિશ્ચતૈઃ ।
આરાધિતા સ્તુતા સૈવ સર્વસિદ્ધિપ્રદાયિની ॥ ૧૩॥

તસ્યાશ્ચાનુગ્રહાદેવ તામેવ સ્તુતવાનહમ્ ।
સહસ્રૈર્નામભિર્દિવ્યૈસ્ત્રૈલોક્ય પ્રણિપૂજિતૈઃ ॥ ૧૪॥

સ્તવેનાનેન સન્તુષ્ટા મામેવ પ્રતિવેશ સા ।
તદારભ્ય મયા પ્રાપ્તમૈશ્વર્યં પદમુત્તમમ્ ॥ ૧૫॥

તત્પ્રભાવાન્મયા સૃષ્ટં જગદેતચ્ચરાચરમ્ ।
સસુરાસુરગન્ધર્વયક્ષરાક્ષસમાનવમ્ ॥ ૧૬॥

સપન્નગં સાચ્છિકં ચ સશૈલવનકાનનમ્ ।
સરાશિગ્રહનક્ષત્રં પઞ્ચભૂતગુણાન્વિતમ્ ॥ ૧૭॥

નન્દિન્નામ સહસ્રેણ સ્તવેનાનેન સર્વદા ।
સ્તૌમ્યહં પરાપરાશક્તિં મમાનુગ્રહકારિણીમ્ ॥ ૧૮॥

ઇત્યુક્ત્વોપરતં દેવં ચરાચરગુરું વિભુમ્ ।
પ્રણમ્ય શિરસા નન્દી પ્રોવાચ પરમેશ્વરમ્ ॥ ૧૯॥

શ્રીનન્દિકેશ્વર ઉવાચ ।
ભગવન્દેવદેવેશ લોકનાથ જગત્પતે ।
ભક્તોઽસ્મિ તવ દાસોઽસ્મિ પ્રસાદઃ ક્રિયતાં મયિ ॥ ૨૦॥

દેવ્યાઃ સ્તવમિદં પુણ્યં દુર્લભં યત્સુરૈરપિ ।
શ્રોતુમિચ્છામ્યહં દેવ પ્રભાવમપિ ચાસ્ય તુ ॥ ૨૧॥

શ ૃણુ નન્દિન્મહાભાગ સ્તવરાજમિમં શુભમ્ ।
સહસ્રૈર્નામભિર્દિવ્યૈઃ સિદ્ધિદં સુખમોક્ષદમ્ ॥ ૨૨॥

શુચિભિઃ પ્રાતરુત્થાય પઠિતવ્યં સમાહિતૈઃ ।
ત્રિકાલં શ્રદ્ધયા યુક્તૈર્નાતઃ પરતરઃ સ્તવ; ॥ ૨૩॥

ૐ અસ્યશ્રીભવાનીનામસહસ્રસ્તવરાજસ્ય,
શ્રીભગવાન્મહાદેવ ઋષિઃ ,અનુષ્ટુપ્છન્દઃ,
આદ્યા શક્તિઃ શ્રીભગવતી ભવાની દેવતા,
હ્રીં બીજં, શ્રીં શક્તિઃ, ક્લીં કીલકં,
શ્રીભગવતીભવાનીપ્રીત્યર્થે જપે વિનિયોગઃ ।
અથ ધ્યાનમ્
અર્ધેન્દુમૌલિમમલામમરાભિવન્દ્યામમ્ભોજપાશસૃણિરક્તકપાલહસ્તામ્ ।
રક્તાઙ્ગરાગરસનાભરણાન્ત્રિનેત્રાન્ધ્યાયેચ્છિવસ્યવનિતાં વિહ્વલાઙ્ગીમ્ ॥ ૧॥

ૐ બાલાર્કમણ્ડલાભાસાં ચતુર્વાહું ત્રિલોચનામ્ ।
પાશાङ्કુશશરં ચાપં ધારયન્તીં શિવાં ભજે ॥ ૨॥

ૐ મહાવિદ્યા જગન્માતા મહાલક્ષ્મીઃ શિવપ્રિયા ।
વિષ્ણુમાયા શુભા શાન્તા સિદ્ધાસિદ્ધસરસ્વતી ॥ ૧॥

ક્ષમા કાન્તિઃ પ્રભા જ્યોત્સ્ના પાર્વતી સર્વમઙ્ગલા ।
હિઙ્ગુલા ચણ્ડિકા દાન્તા પદ્મા લક્ષ્મીર્હરિપ્રિયા ॥ ૨॥

ત્રિપુરા નન્દિની નન્દા સુનન્દા સુરવન્દિતા ।
યજ્ઞવિદ્યા મહામાયા વેદમાતા સુધાધૃતિઃ ॥ ૩॥

પ્રીતિપ્રદા પ્રસિદ્ધા ચ મૃડાની વિન્ધ્યવાસિની ।
સિદ્ધવિદ્યા મહાશક્તિઃ પૃથિવી નારદસેવિતા ॥ ૪॥

પુરુહૂતપ્રિયા કાન્તા કામિની પદ્મલોચના ।
પ્રહ્લાદિની મહામાતા દુર્ગા દુર્ગતિનાશિની ॥ ૫॥

જ્વાલામુખી સુગોત્રા ચ જ્યોતિઃ કુમુદવાસિની ।
દુર્ગમા દુર્લભા વિદ્યા સ્વર્ગતિઃ પુરવાસિની ॥ ૬॥

અપર્ણા શામ્બરી માયા મદિરામૃદુહાસિની ।
કુલવાગીશ્વરી નિત્યા નિત્યક્લિન્ના કૃશોદરી ॥ ૭॥

કામેશ્વરી ચ નીલા ચ ભિરુણ્ડા વહ્નિવાસિની ।
લમ્બોદરી મહાકાલી વિદ્યાવિદ્યેશ્વરી તથા ॥ ૮॥

નરેશ્વરી ચ સત્યા ચ સર્વસૌભાગ્યવર્ધિની ।
સઙ્કર્ષિણી નારસિંહી વૈષ્ણવી ચ મહોદરી ॥ ૯॥

કાત્યાયની ચ ચમ્પા ચ સર્વસમ્પત્તિકારિણી ।
નારાયણી મહાનિદ્રા યોગનિદ્રા પ્રભાવતી ॥ ૧૦॥

પ્રજ્ઞા પારમિતાપ્રાજ્ઞા તારા મધુમતી મધુઃ ।
ક્ષીરાર્ણવસુધાહારા કાલિકા સિંહવાહના ॥ ૧૧॥

ૐકારા ચ સુધાકારા ચેતના કોપનાકૃતિઃ ।
અર્ધબિન્દુધરાધારા વિશ્વમાતા કલાવતી ॥ ૧૨॥

પદ્માવતી સુવસ્ત્રા ચ પ્રબુદ્ધા ચ સરસ્વતી ।
કુણ્ડાસના જગદ્ધાત્રી બુદ્ધમાતા જિનેશ્વરી ॥ ૧૩॥

જિનમાતા જિનેન્દ્રા ચ શારદા હંસવાહના ।
રાજલક્ષ્મીર્વષટ્કારા સુધાકારા સુધોત્સુકા ॥ ૧૪॥

રાજનીતિસ્ત્રયી વાર્તા દણ્ડનીતિઃ ક્રિયાવતી ।
સદ્ભૂતિસ્તારિણી શ્રદ્ધા સદ્ગતિઃ સત્યપરાયણા ॥ ૧૫॥

સિન્ધુર્મન્દાકિની ગઙ્ગા યમુના ચ સરસ્વતી ।
ગોદાવરી વિપાશા ચ કાવેરી ચ શતહ્રદા ॥ ૧૬॥

સરયૂશ્ચન્દ્રભાગા ચ કૌશિકી ગણ્ડકી શુચિઃ ।
નર્મદા કર્મનાશા ચ ચર્મણ્વતી ચ વેદિકા ॥ ૧૭॥

વેત્રવતી વિતસ્તા ચ વરદા નરવાહના ।
સતી પતિવ્રતા સાધ્વી સુચક્ષુઃ કુણ્ડવાસિની ॥ ૧૮॥

એકચક્ષુઃ સહસ્રાક્ષી સુશ્રોણિર્ભગમાલિની ।
સેનાશ્રોણિઃ પતાકા ચ સુવ્યૂહા યુદ્ધકાંક્ષિણી ॥ ૧૯॥

પતાકિની દયારમ્ભા વિપઞ્ચી પઞ્ચમપ્રિયા ।
પરા પરકલાકાન્તા ત્રિશક્તિર્મોક્ષદાયિની ॥ ૨૦॥

ઐન્દ્રી માહેશ્વરી બ્રાહ્મી કૌમારી કમલાસના ।
ઇચ્છા ભગવતી શક્તિઃ કામધેનુઃ કૃપાવતી ॥ ૨૧॥

વજ્રાયુધા વજ્રહસ્તા ચણ્ડી ચણ્ડપરાક્રમા ।
ગૌરી સુવર્ણવર્ણા ચ સ્થિતિસંહારકારિણી ॥ ૨૨॥

એકાનેકા મહેજ્યા ચ શત બાહુર્મહાભુજા ।

ભુજઙ્ગભૂષણા ભૂષા ષટ્ચક્રાક્રમવાસિની ॥ ૨૩॥

ષટ્ચક્રભેદિની શ્યામા કાયસ્થા કાયવર્જિતા ।
સુસ્મિતા સુમુખી ક્ષામા મૂલપ્રકૃતિરીશ્વરી ॥ ૨૪॥

અજા ચ બહુવર્ણા ચ પુરુષાર્થપ્રર્વતિની ।
રક્તા નીલા સિતા શ્યામા કૃષ્ણા પીતા ચ કર્બુરા ॥ ૨૫॥

ક્ષુધા તૃષ્ણા જરા વૃદ્ધા તરુણી કરુણાલયા ।
કલા કાષ્ઠા મુહૂર્તા ચ નિમિષા કાલરૂપિણી ॥ ૨૬॥

સુવર્ણરસના નાસાચક્ષુઃ સ્પર્શવતી રસા ।
ગન્ધપ્રિયા સુગન્ધા ચ સુસ્પર્શા ચ મનોગતિઃ ॥ ૨૭॥

મૃગનાભિર્મૃગાક્ષી ચ કર્પૂરામોદધારિણી ।
પદ્મયોનિઃ સુકેશી ચ સુલિઙ્ગા ભગરૂપિણી ॥ ૨૮॥

યોનિમુદ્રા મહામુદ્રા ખેચરી ખગગામિની ।
મધુશ્રીર્માધવી વલ્લી મધુમત્તા મદોદ્ધતા ॥ ૨૯॥

માતઙ્ગી શુકહસ્તા ચ પુષ્પબાણેક્ષુચાપિની ।
રક્તામ્બરધરાક્ષીબા રક્તપુષ્પાવતંસિની ॥ ૩૦॥

શુભ્રામ્બરધરા ધીરા મહાશ્વેતા વસુપ્રિયા ।
સુવેણી પદ્મહસ્તા ચ મુક્તાહારવિભૂષણા ॥ ૩૧॥

કર્પૂરામોદનિઃશ્વાસા પદ્મિની પદ્મમન્દિરા ।
ખડ્ગિની ચક્રહસ્તા ચ ભુશુણ્ડી પરિઘાયુધા ॥ ૩૨॥

ચાપિની પાશહસ્તા ચ ત્રિશૂલવરધારિણી ।
સુબાણા શક્તિહસ્તા ચ મયૂરવરવાહના ॥ ૩૩॥

વરાયુધધરા વીરા વીરપાનમદોત્કટા ।
વસુધા વસુધારા ચ જયા શાકમ્ભરી શિવા ॥ ૩૪॥

વિજયા ચ જયન્તી ચ સુસ્તની શત્રુનાશિની ।
અન્તર્વતી વેદશક્તિર્વરદા વરધારિણી ॥ ૩૫॥

શીતલા ચ સુશીલા ચ બાલગ્રહવિનાશિની ।
કૌમારી ચ સુપર્ણા ચ કામાખ્યા કામવન્દિતા ॥ ૩૬॥

જાલન્ધરધરાનન્તા કામરૂપનિવાસિની ।
કામબીજવતી સત્યા સત્યમાર્ગપરાયણા ॥ ૩૭॥

સ્થૂલમાર્ગસ્થિતા સૂક્ષ્મા સૂક્ષ્મબુદ્ધિપ્રબોધિની ।
ષટ્કોણા ચ ત્રિકોણા ચ ત્રિનેત્રા ત્રિપુરસુન્દરી ॥ ૩૮॥

વૃષપ્રિયા વૃષારૂઢા મહિષાસુરઘાતિની ।
શુમ્ભદર્પહરા દીપ્તા દીપ્તપાવકસન્નિભા ॥ ૩૯॥

કપાલભૂષણા કાલી કપાલામાલ્યધારિણી ।
કપાલકુણ્ડલા દીર્ઘા શિવદૂતી ઘનધ્વનિઃ ॥ ૪૦॥

સિદ્ધિદા બુદ્ધિદા નિત્યા સત્યમાર્ગપ્રબોધિની ।
કમ્બુગ્રીવાવસુમતી છત્રચ્છાયા કૃતાલયા ॥ ૪૧॥

જગદ્ગર્ભા કુણ્ડલિની ભુજગાકારશાયિની ।
પ્રોલ્લસત્સપ્તપદ્મા ચ નાભિનાલમૃણાલિની ॥ ૪૨॥

મૂલાધારા નિરાકારા વહ્નિકુણ્ડકૃતાલયા ।
વાયુકુણ્ડસુખાસીના નિરાધારા નિરાશ્રયા ॥ ૪૩॥

શ્વાસોચ્છ્વાસગતિર્જીવા ગ્રાહિણી વહ્નિસંશ્રયા ।
વલ્લીતન્તુસમુત્થાના ષડ્રસા સ્વાદલોલુપા ॥ ૪૪॥

તપસ્વિની તપઃસિદ્ધિ તપસઃ સિદ્ધિદાયિની ।
તપોનિષ્ઠા તપોયુક્તાઃ તાપસી ચ તપઃપ્રિયા ॥ ૪૫॥

સપ્તધાતુર્મયીર્મૂર્તિઃ સપ્તધાત્વન્તરાશ્રયા ।
દેહપુષ્ટિર્મનઃપુષ્ટિરન્નપુષ્ટિર્બલોદ્ધતા ॥ ૪૬॥

ઔષધી વૈદ્યમાતા ચ દ્રવ્યશક્તિપ્રભાવિની ।
વૈદ્યા વૈદ્યચિકિત્સા ચ સુપથ્યા રોગનાશિની ॥ ૪૭॥

મૃગયા મૃગમાંસાદા મૃગત્વઙ્ મૃગલોચના ।
વાગુરાબન્ધરૂપા ચ બન્ધરૂપાવધોદ્ધતા ॥ ૪૮॥

બન્દી બન્દિસ્તુતા કારાગારબન્ધવિમોચિની ।
શ‍ૃઙ્ખલા કલહા બદ્ધા દૃઢબન્ધવિમોક્ષિણી ॥ ૪૯॥

અમ્બિકામ્બાલિકા ચામ્બા સ્વચ્છા સાધુજનાર્ચિતા ।
કૌલિકી કુલવિદ્યા ચ સુકુલા કુલપૂજિતા ॥ ૫૦॥

કાલચક્રભ્રમા ભ્રાન્તા વિભ્રમાભ્રમનાશિની ।
વાત્યાલી મેઘમાલા ચ સુવૃષ્ટિઃ સસ્યર્વધિની ॥ ૫૧॥

અકારા ચ ઇકારા ચ ઉકારૌકારરૂપિણી ।
હ્રીઙ્કાર બીજરૂપા ચ ક્લીઙ્કારામ્બરવાસિની ॥ ૫૨॥

સર્વાક્ષરમયીશક્તિરક્ષરા વર્ણમાલિની ।
સિન્દૂરારુણવર્ણા ચ સિન્દૂરતિલકપ્રિયા ॥ ૫૩॥

વશ્યા ચ વશ્યબીજા ચ લોકવશ્યવિભાવિની ।
નૃપવશ્યા નૃપૈઃ સેવ્યા નૃપવશ્યકરપ્રિયા ॥ ૫૪॥

મહિષા નૃપમાન્યા ચ નૃપાન્યા નૃપનન્દિની ।
નૃપધર્મમયી ધન્યા ધનધાન્યવિવર્ધિની ॥ ૫૫॥

ચતુર્વર્ણમયીમૂર્તિશ્ચતુર્વર્ણૈશ્ચ પૂજિતા ।
સર્વધર્મમયીસિદ્ધિ શ્ચતુરાશ્રમવાસિની ॥ ૫૬॥

બ્રાહ્મણી ક્ષત્રિયા વૈશ્યા શૂદ્રા ચાવરવર્ણજા ।
વેદમાર્ગરતા યજ્ઞા વેદિર્વિશ્વવિભાવિની ॥ ૫૭॥

અનુશસ્ત્રમયી વિદ્યા વરશસ્ત્રાસ્ત્રધારિણી ।
સુમેધા સત્યમેધા ચ ભદ્રકાલ્યપરાજિતા ॥ ૫૮॥

ગાયત્રી સત્કૃતિઃ સન્ધ્યા સાવિત્રી ત્રિપદાશ્રયા ।
ત્રિસન્ધ્યા ત્રિપદી ધાત્રી સુપર્વા સામગાયિની ॥ ૫૯॥

પાઞ્ચાલી બાલિકા બાલા બાલક્રીડા સનાતની ।
ગર્ભાધારધરાશૂન્યા ગર્ભાશયનિવાસિની ॥ ૬૦॥

સુરારિઘાતિની કૃત્યા પૂતના ચ તિલોત્તમા ।
લજ્જા રસવતી નન્દા ભવાની પાપનાશિની ॥ ૬૧॥

પટ્ટામ્બરધરા ગીતિઃ સુગીતિર્જ્ઞાનગોચરા ।
સપ્તસ્વરમયી તન્ત્રી ષડ્જમધ્યમધૈવતા ॥ ૬૨॥

મૂર્છના ગ્રામસંસ્થાના મૂર્છા સુસ્થાનવાસિની ।
અટ્ટાટ્ટહાસિની પ્રેતા પ્રેતાસનનિવાસિની ॥ ૬૩॥

ગીતનૃત્યપ્રિયા કામા તુષ્ટિદા પુષ્ટિદા ક્ષમા ।

નિષ્ઠા સત્યપ્રિયા પ્રાજ્ઞા લોલાક્ષી ચ સુરોત્તમા ॥ ૬૪॥

સવિષા જ્વાલિની જ્વાલા વિશ્વમોહાર્તિનાશિની ।
શતમારી મહાદેવી વૈષ્ણવી શતપત્રિકા ॥ ૬૫॥

વિષારિર્નાગદમની કુરુકુલ્લ્યાઽમૃતોદ્ભવા ।
ભૂતભીતિહરારક્ષા ભૂતાવેશવિનાશિની ॥ ૬૬॥

રક્ષોઘ્ની રાક્ષસી રાત્રિર્દીર્ઘનિદ્રા નિવારિણી ।
ચન્દ્રિકા ચન્દ્રકાન્તિશ્ચ સૂર્યકાન્તિર્નિશાચરી ॥ ૬૭॥

ડાકિની શાકિની શિષ્યા હાકિની ચક્રવાકિની ।
શીતા શીતપ્રિયા સ્વઙ્ગા સકલા વનદેવતા ॥ ૬૮॥

ગુરુરૂપધરા ગુર્વી મૃત્યુર્મારી વિશારદા ।
મહામારી વિનિદ્રા ચ તન્દ્રા મૃત્યુવિનાશિની ॥ ૬૯॥

ચન્દ્રમણ્ડલસઙ્કાશા ચન્દ્રમણ્ડલવાસિની ।
અણિમાદિગુણોપેતા સુસ્પૃઅહા કામરૂપિણી ॥ ૭૦॥

અષ્ટસિદ્ધિપ્રદા પ્રૌઢા દુષ્ટદાનવઘાતિની ।
અનાદિનિધના પુષ્ટિશ્ચતુર્બાહુશ્ચતુર્મુખી ॥ ૭૧॥

ચતુસ્સમુદ્રશયના ચતુર્વર્ગફલપ્રદા ।
કાશપુષ્પપ્રતીકાશા શરત્કુમુદલોચના ॥ ૭૨॥

સોમસૂર્યાગ્નિનયના બ્રહ્મવિષ્ણુશિવાર્ચિતા ।
કલ્યાણીકમલા કન્યા શુભા મઙ્ગલચણ્ડિકા ॥ ૭૩॥

ભૂતા ભવ્યા ભવિષ્યા ચ શૈલજા શૈલવાસિની ।
વામમાર્ગરતા વામા શિવવામાઙ્ગવાસિની ॥ ૭૪॥

વામાચારપ્રિયા તુષ્ટિર્લોપામુદ્રા પ્રબોધિની ।
ભૂતાત્મા પરમાત્મા ભૂતભાવવિભાવિની ॥ ૭૫॥

મઙ્ગલા ચ સુશીલા ચ પરમાર્થપ્રબોધિની ।
દક્ષિઈણા દક્ષિણામૂર્તિઃ સુદીક્ષા ચ હરિપ્રસૂઃ ॥ ૭૬॥

યોગિની યોગયુક્તા ચ યોગાઙ્ગ ધ્યાનશાલિની ।
યોગપટ્ટધરા મુક્તા મુક્તાનાં પરમા ગતિઃ ॥ ૭૭॥

નારસંૃહી સુજન્મા ચ ત્રિવર્ગફલદાયિની ।
ધર્મદા ધનદા ચૈવ કામદા મોક્ષદાદ્યુતિઃ ॥ ૭૮॥

સાક્ષિણી ક્ષણદા કાંક્ષા દક્ષજા કૂટરૂપિણી ।
ઋઅતુઃ કાત્યાયની સ્વચ્છા સુચ્છન્દા કવિપ્રિયા ॥ ૭૯॥

સત્યાગમા બહિઃસ્થા ચ કાવ્યશક્તિઃ કવિત્વદા ।
મીનપુત્રી સતી સાધ્વી મૈનાકભગિની તડિત્ ॥ ૮૦॥

સૌદામિની સુદામા ચ સુધામા ધામશાલિની ।
સૌભાગ્યદાયિની દ્યૌશ્ચ સુભગા દ્યુતિવર્ધિની ॥ ૮૧॥

શ્રીકૃત્તિવસના ચૈવ કઙ્કાલી કલિનાશિની ।
રક્તબીજવધોદ્યુક્તા સુતન્તુર્બીજસન્તતિઃ ॥ ૮૨॥

જગજ્જીવા જગદ્બીજા જગત્ત્રયહિતૈષિણી ।
ચામીકરરુચિશ્ચન્દ્રી સાક્ષાદ્યા ષોડશી કલા ॥ ૮૩॥

યત્તત્પદાનુબન્ધા ચ યક્ષિણી ધનદાર્ચિતા ।
ચિત્રિણી ચિત્રમાયા ચ વિચિત્રા ભુવનેશ્વરી ॥ ૮૪॥

ચામુણ્ડા મુણ્ડહસ્તા ચ ચણ્ડમુણ્ડવધોદ્યતા ।
અષ્ટમ્યેકાદશી પૂર્ણા નવમી ચ ચતુર્દશી ॥ ૮૫॥

ઉમા કલશહસ્તા ચ પૂર્ણકુમ્ભપયોધરા ।
અભીરુર્ભૈરવી ભીરૂ ભીમા ત્રિપુરભૈરવી ॥ ૮૬॥

મહાચણ્ડી ચ રૌદ્રી ચ મહાભૈરવપૂજિતા ।
નિર્મુણ્ડા હસ્તિનીચણ્ડા કરાલદશનાનના ॥ ૮૭॥

કરાલા વિકરાલા ચ ઘોરા ઘુર્ઘુરનાદિની ।
રક્તદન્તોર્ધ્વકેશી ચ બન્ધૂકકુસુમારુણા ॥ ૮૮॥

કાદમ્બિની વિપાશા ચ કાશ્મીરી કુઙ્કુમપ્રિયા ।
ક્ષાન્તિર્બહુસુવર્ણા ચ રતિર્બહુસુવર્ણદા ॥ ૮૯॥

માતઙ્ગિની વરારોહા મત્તમાતઙ્ગગામિની ।
હંસા હંસગતિર્હંસી હંસોજ્વલશિરોરુહા ॥ ૯૦॥

પૂર્ણચન્દ્રમુખી શ્યામા સ્મિતાસ્યા ચ સુકુણ્ડલા ।
મહિષી ચ લેખની લેખા સુલેખા લેખકપ્રિયા ॥ ૯૧॥

શઙ્ખિની શઙ્ખહસ્તા ચ જલસ્થા જલદેવતા ।
કુરુક્ષેત્રાઽવનિઃ કાશી મથુરા કાઞ્ચ્યવન્તિકા ॥ ૯૨॥

અયોધ્યા દ્વારિકા માયા તીર્થા તીર્થકરપ્રિયા ।
ત્રિપુષ્કરાઽપ્રમેયા ચ કોશસ્થા કોશવાસિની ॥ ૯૩॥

કૌશિકી ચ કુશાવર્તા કૌશામ્બી કોશવર્ધિની ।
કોશદા પદ્મકોશાક્ષી કૌસુમ્ભકુસુમપ્રિયા ॥ ૯૪॥

તોતલા ચ તુલાકોટિઃ કૂટસ્થા કોટરાશ્રયા ।
સ્વયમ્ભૂશ્ચ સુરૂપા ચ સ્વરૂપા પુણ્યવર્ધિની ॥ ૯૫॥

તેજસ્વિની સુભિક્ષા ચ બલદા બલદાયિની ।
મહાકોશી મહાવાર્તા બુદ્ધિઃ સદસદાત્મિકા ॥ ૯૬॥

મહાગ્રહહરા સૌમ્યા વિશોકા શોકનાશિની ।
સાત્વિકી સત્વસંસ્થા ચ રાજસી ચ રજોવૃતા ॥ ૯૭॥

તામસી ચ તમોયુક્તા ગુણત્રયવિભાવિની ।
અવ્યક્તા વ્યક્તરૂપા ચ વેદવિદ્યા ચ શામ્ભવી ॥ ૯૮॥

શઙ્કરા કલ્પિની કલ્પા મનસ્સઙ્કલ્પસન્તતિઃ ।
સર્વલોકમયી શક્તિઃ સર્વશ્રવણગોચરા ॥ ૯૯॥

સર્વજ્ઞાનવતી વાઞ્છા સર્વતત્ત્વાવબોધિકા ।
જાગ્રતિશ્ચ સુષુપ્તિશ્ચ સ્વપ્નાવસ્થા તુરીયકા ॥ ૧૦૦॥

સત્વરા મન્દરા ગતિર્મન્દા મન્દિરા મોદદાયિની ।
માનભૂમિઃ પાનપાત્રા પાનદાનકરોદ્યતા ॥ ૧૦૧॥

આઘૂર્ણારુણનેત્રા ચ કિઞ્ચિદવ્યક્તભાષિણી ।
આશાપુરા ચ દીક્ષા ચ દક્ષા દીક્ષિતપૂજિતા ॥ ૧૦૨॥

નાગવલ્લી નાગકન્યા ભોગિની ભોગવલ્લભા ।
સર્વશાસ્ત્રમયી વિદ્યા સુસ્મૃતિર્ધર્મવાદિની ॥ ૧૦૩॥

શ્રુતિસ્મૃતિધરા જ્યેષ્ઠા શ્રેષ્ઠા પાતાલવાસિની ।
મીમાંસા તર્કવિદ્યા ચ સુભક્તિર્ભક્તવત્સલા ॥ ૧૦૪॥

સુનાભિર્યાતનાજાતિર્ગમ્ભીરા ભાવવર્જિતા ।

નાગપાશધરામૂર્તિરગાધા નાગકુણ્ડલા ॥ ૧૦૫॥

સુચક્રા ચક્રમધ્યસ્થા ચક્રકોણનિવાસિની ।
સર્વમન્ત્રમયી વિદ્યા સર્વમન્ત્રાક્ષરાવલિઃ ॥ ૧૦૬॥

મધુસ્રવાસ્રવન્તી ચ ભ્રામરી ભ્રમરાલિકા ।
માતૃમણ્ડલમધ્યસ્થા માતૃમણ્ડલવાસિની ॥ ૧૦૭॥

કુમાર જનની ક્રૂરા સુમુખી જ્વરનાશિની ।
નિધાના પઞ્ચભૂતાનાં ભવસાગરતારિણી ॥ ૧૦૮॥

અક્રૂરા ચ ગ્રહાવતી વિગ્રહા ગ્રહવર્જિતા ।
રોહિણી ભૂમિગર્મા ચ કાલભૂઃ કાલવર્તિની ॥ ૧૦૯॥

કલઙ્કરહિતા નારી ચતુઃષષ્ટ્યભિધાવતી ।
અતીતા વિદ્યમાના ચ ભાવિની પ્રીતિમઞ્જરી ॥ ૧૧૦॥

સર્વસૌખ્યવતીયુક્તિરાહારપરિણામિની ।
જીર્ણા ચ જીર્ણવસ્રા ચ નૂતના નવવલ્લભા ॥ ૧૧૧॥

અજરા ચ રજઃપ્રીતા રતિરાગવિવર્ધિની ।
પઞ્ચવાતગતિર્ભિન્ના પઞ્ચશ્લેષ્માશયાધરા ॥ ૧૧૨॥

પઞ્ચપિત્તવતીશક્તિઃ પઞ્ચસ્થાનવિભાવિની ।
ઉદક્યા ચ વૃષસ્યન્તી બહિઃ પ્રસ્રવિણી ત્ર્યહા ॥ ૧૧૩॥

રજઃશુક્રધરા શક્તિર્જરાયુર્ગર્ભધારિણી ।
ત્રિકાલજ્ઞા ત્રિલિઙ્ગા ચ ત્રિમૂર્તિસ્ત્રિપુરવાસિની ॥ ૧૧૪॥

અરાગા શિવતત્ત્વા ચ કામતત્વાનુરાગિણી ।
પ્રાચ્યવાચી પ્રતીચી ચ દિગુદીચી ચ દિગ્વિદિગ્દિશા ॥ ૧૧૫॥

અહઙ્કૃતિરહઙ્કારા બાલા માયા બલિપ્રિયા ।
શુક્રશ્રવા સામિધેની સુશ્રદ્ધા શ્રાદ્ધદેવતા ॥ ૧૧૬॥

માતા માતામહી તૃપ્તિઃ પિતુમાતા પિતામહી ।
સ્નુષા દૌહિત્રિણી પુત્રી પૌત્રી નપ્ત્રી શિશુપ્રિયા ॥ ૧૧૭॥

સ્તનદા સ્તનધારા ચ વિશ્વયોનિઃ સ્તનન્ધયી ।
શિશૂત્સઙ્ગધરા દોલા લોલા ક્રીડાભિનન્દિની ॥ ૧૧૮॥

ઉર્વશી કદલી કેકા વિશિખા શિખિવર્તિની ।
ખટ્વાઙ્ગધારિણી ખટ્વ બાણપુઙ્ખાનુવર્તિની ॥ ૧૧૯॥

લક્ષ્યપ્રાપ્તિકરા લક્ષ્યાલધ્યા ચ શુભલક્ષણા ।
વર્તિની સુપથાચારા પરિખા ચ ખનિર્વુતિઃ ॥ ૧૨૦॥

પ્રાકારવલયા વેલા મર્યાદા ચ મહોદધિઃ ।
પોષિણી શોષિણી શક્તિર્દીર્ઘકેશી સુલોમશા ॥ ૧૨૧॥

લલિતા માંસલા તન્વી વેદવેદાઙ્ગધારિણી ।
નરાસૃક્પાનમત્તા ચ નરમુણ્ડાસ્થિભૂષણા ॥ ૧૨૨॥

અક્ષક્રીડારતિઃ શારિ શારિકાશુકભાષિણી ।
શામ્ભરી ગારુડીવિદ્યા વારુણી વરુણાર્ચિતા ॥ ૧૨૩॥

વારાહી તુણ્ડહસ્તા ચ દંષ્ટ્રોદ્ધૃતવસુન્ધરા ।
મીનમૂર્તિર્ધરામૂર્તિઃ વદાન્યાઽપ્રતિમાશ્રયા ॥ ૧૨૪॥

અમૂર્તા નિધિરૂપા ચ શાલિગ્રામશિલાશુચિઃ ।
સ્મૃતિસંસ્કારરૂપા ચ સુસંસ્કારા ચ સંસ્કૃતિઃ ॥ ૧૨૫॥

પ્રાકૃતા દેશભાષા ચ ગાથા ગીતિઃ પ્રહેલિકા ।
ઇડા ચ પિઙ્ગલા પિઙ્ગા સુષુમ્ના સૂર્યવાહિની ॥ ૧૨૬॥

શશિસ્રવા ચ તાલુસ્થા કાકિન્યમૃતજીવિની ।
અણુરૂપા બૃહદ્રૂપા લઘુરૂપા ગુરુસ્થિતા ॥ ૧૨૭॥

સ્થાવરા જઙ્ગમાચૈવ કૃતકર્મફલપ્રદા ।
વિષયાક્રાન્તદેહા ચ નિર્વિશેષા જિતેન્દ્રિયા ॥ ૧૨૮॥

ચિત્સ્વરૂપા ચિદાનન્દા પરબ્રહ્મપ્રબોધિની ।
નિર્વિકારા ચ નિર્વૈરા વિરતિઃ સત્યવર્દ્ધિની ॥ ૧૨૯॥

પુરુષાજ્ઞા ચા ભિન્ના ચ ક્ષાન્તિઃ કૈવલ્યદાયિની ।
વિવિક્તસેવિની પ્રજ્ઞા જનયિત્રી ચ બહુશ્રુતિઃ ॥ ૧૩૦॥

નિરીહા ચ સમસ્તૈકા સર્વલોકૈકસેવિતા ।
શિવા શિવપ્રિયા સેવ્યા સેવાફલવિવર્દ્ધિની ॥ ૧૩૧॥

કલૌ કલ્કિપ્રિયા કાલી દુષ્ટમ્લેચ્છવિનાશિની ।
પ્રત્યઞ્ચા ચ ધુનર્યષ્ટિઃ ખડ્ગધારા દુરાનતિઃ ॥ ૧૩૨॥

અશ્વપ્લુતિશ્ચ વલ્ગા ચ સૃણિઃ સ્યન્મૃત્યુવારિણી ।
વીરભૂર્વીરમાતા ચ વીરસૂર્વીરનન્દિની ॥ ૧૩૩॥

જયશ્રીર્જયદીક્ષા ચ જયદા જયવર્દ્ધિની ।
સૌભાગ્યસુભગાકારા સર્વસૌભાગ્યવર્દ્ધિની ॥ ૧૩૪॥

ક્ષેમઙ્કરી ક્ષેમરૂપા સત્કીર્ત્તિઃ પથિદેવતા ।
સર્વતીર્થમયીમૂર્તિઃ સર્વદેવમયીપ્રભા ॥ ૧૩૫॥

સર્વસિદ્ધિપ્રદા શક્તિઃ સર્વમઙ્ગલમઙ્ગલા ।
પુણ્યં સહસ્રનામેદં શિવાયાઃ શિવભાષિતમ્ ॥ ૧૩૬॥

યઃ પઠેત્પ્રાતરુત્થાય શુચિર્ભૂત્વા સમાહિતઃ ।
યશ્ચાપિશ‍ૃણુયાન્નિત્યં નરો નિશ્ચલમાનસઃ ॥ ૧૩૭॥

એકકાલં દ્વિકાલં વા ત્રિકાલં શ્રદ્ધયાન્વિતઃ ।
સર્વદુઃખવિનિર્મુક્તો ધનધાન્યસમન્વિતઃ ॥ ૧૩૮॥

તેજસ્વી બલવાઞ્છૂરઃ શોકરોગવિવર્જિતઃ ।
યશસ્વી કીર્તિમાન્ધન્યઃ સુભગો લોકપૂજિતઃ ॥ ૧૩૯॥

રૂપવાન્ગુણસમ્પન્નઃ પ્રભાવીર્યસમન્વિતઃ ।
શ્રેયાંસિ લભતેનિત્યં નિશ્ચલાં ચ શુભાં શ્રિયમ્ ॥ ૧૪૦॥

સર્વપાપવિનિર્મુક્તો લોભક્રોધ વિવર્જિતઃ ।
નિત્યં બન્ધુસુતૈર્ દારૈઃ પુત્રપૌત્રૈર્મહોત્સવૈઃ ॥ ૧૪૧॥

નન્દિતઃ સેવિતો ભૃત્યૈર્બહુભિઃ શુદ્ધમાનસૈઃ ।
વિદ્યાનાં પારગો વિપ્રઃ ક્ષત્રિયો વિજયી રણે । ॥ ૧૪૨॥

વૈશ્યસ્તુધનલાભાઢ્યઃ શૂદ્રશ્ચસુખમેધતે ।
પુત્રાર્થી લભતે પુત્રં ધનાર્થી લભતે ધનમ્ ॥ ૧૪૩॥

ઇચ્છાકામં તુ કામાર્થી ધર્માર્થી ધર્મમક્ષયમ્ ।
કન્યાર્થી લભતે કન્યાં રૂપશીલગુણાન્વિતામ્ ॥ ૧૪૪॥

ક્ષેત્રં ચ બહુશસ્યં સ્યાદ્ગાવસ્તુ બહુદુગ્ધદાઃ ।
નાશુભં નાપદસ્તસ્ય ન ભયં નૃપશત્રુભિઃ ॥ ૧૪૫॥

જાયતે ના શુભાબુદ્ધિર્લભતે કુલધુર્યતામ્ ।

ન બાધન્તે ગ્રહાસ્તસ્ય ન રક્ષાંસિ ન પન્નગાઃ ॥ ૧૪૬॥

ન પિશાચો ન ડાકિન્યો ભૂતવ્યન્તરજૃમ્ભિકાઃ ।
બાલગ્રહાભિભૂતાનાં બાલાનાં શાન્તિકારકમ્ ॥ ૧૪૭॥

દ્વન્દ્વાનાં પ્રીતિભેદે ચ મૈત્રીકરણમુત્તમમ્ ।
લોહપાશૈર્દૃઢૈર્બદ્ધો બદ્ધો વેશ્મનિ દુર્ગમે ॥ ૧૪૮॥

તિષ્ઠન્ શ્ૃણ્વન્પઠેન્મર્ત્યો મુચ્યતે નાત્ર સંશયઃ ।
ન દારાણાં ન પુત્રાણાં ન બન્ધૂનાં ન મિત્રજમ્ ॥ ૧૪૯॥

પશ્યન્તિ નહિ તે શોકં હિ વિયોગં ચિરજીવિતામ્ ।
અન્ધસ્તુ લભતે દૃષ્ટિં ચક્ષુરોગૈર્નબાધ્યતે ॥ ૧૫૦॥

બધિરઃ શ્રુતિમાપ્નોતિ મૂકો વાચં શુભાન્નરઃ ।
એતદ્ગર્ભા ચ યા નારી સ્થિરગર્ભા પ્રજાયતે ॥ ૧૫૧॥

સ્રાવણી બદ્ધગર્ભા ચ સુખમેવપ્રસૂયતે ।
કુષ્ઠિનઃ શીર્ણદેહા યે ગતકેશનખત્વચઃ ॥ ૧૫૨॥

પઠનાચ્છ્રવણા દ્વાપિ દિવ્યકાયા ભવન્તિ તે ।
યે પઠન્તિ શતાવર્તં શુચિષ્મન્તો જિતેન્દ્રિયાઃ ॥ ૧૫૩॥

અપુત્રાઃ પ્રાપ્નુયુઃ પુત્રાન્ શ્ૃણ્વન્તોઽપિ ન સંશયઃ ।
મહાવ્યાધિ પરિગ્રસ્તાસ્તપ્તા યે વિવિધૈર્જ્વરૈઃ ॥ ૧૫૪॥

ભૂતાભિષઙ્ગ સઙ્ઘાતૈશ્ચાર્તુથિક તૃતીયકૈઃ ।
અન્યૈશ્ચ દારુણૈરોગૈઃ પીડ્યમાનાશ્ચ માનવાઃ ॥ ૧૫૫॥

ગતબાધાઃ પ્રજાયન્તે મુક્તાસ્તેતૈર્નસંશયઃ ।
શ્રુતિગ્રન્થધરોબાલો દિવ્યવાદી કવીશ્વરઃ ॥ ૧૫૬॥

પઠનાચ્છ્રવણાદ્વાપિ ભવત્યેવ ન સંશયઃ ।
અષ્ટમ્યાં વા ચતુર્દશ્યાં નવમ્યાં ચૈકચેતસઃ ॥ ૧૫૭॥

યે પઠન્તિ સદાભક્ત્યા ન તે વૈ દુઃખભાગિનઃ ।
નવરાત્રં જિતાહારો દૃઢભક્તિર્જિન્તેન્દ્રિયઃ ॥ ૧૫૮॥

ચણ્ડિકાયતને વિદ્વાન્છુચિષ્માન્ મૂર્તિસન્નિધૌ ।
એકાકી ચ શતાવર્તં પઠન્ધીરશ્ચ નિર્ભયઃ ॥ ૧૫૯॥

સાક્ષાદ્ભગવતી તસ્મૈ પ્રયચ્છેદીપ્સિતં ફલમ્ ।
સિદ્ધપીઠે ગિરૌ રમ્યે સિદ્ધક્ષેત્રે સુરાલયે ॥ ૧૬૦॥

પઠનાત્સાધકસ્યાશુ સિદ્ધિર્ભવતિ વાઞ્છિતા ।
દશાવર્તં પઠેન્નિત્યં ભૂમિશાયી નરઃ શુચિઃ ॥ ૧૬૧॥

સ્વપ્ને મૂર્તિમયીં દેવીં વરદાં સોઽપિ પશ્યતિ ।
આવર્તન સહસ્રૈર્યે પઠન્તિ પુરુષોત્તમાઃ ॥ ૧૬૨॥

તે સિદ્ધાઃ સિદ્ધિદા લોકે શાપાનુગ્રહણે ક્ષમાઃ ।
કવિત્વં સંસ્કૃતેતેષાં શાસ્રાણાં વ્યાકૃતૌ તતઃ ॥ ૧૬૩॥

શક્તિઃ પ્રોન્મીલ્યતે શાસ્ત્રેષ્વનધીતેષુ ભારતી ।
નખરાગશિરોરત્નદ્વિગુણીકૃતરોચિષઃ ॥ ૧૬૪॥

પ્રયચ્છન્તશ્ચ સર્વસ્વં સેવન્તે તાન્મહીશ્વરાઃ ।
રોચનાલિખિતં ભૂર્જે કુઙ્કુમેન શુભે દિને ॥ ૧૬૫॥

ધારયેદ્યન્ત્રિતં દેહે પૂજયિત્વા કુમારિકામ્ ।
વિપ્રાગ્શ્ચ વરનારીશ્ચ ધૂપૈઃ કુસુમચન્દનૈઃ ॥ ૧૬૬॥

ક્ષીરખણ્ડાજ્ય ભોજ્યૈશ્ચ પૂજયિત્વા સુભૂષિતાઃ ।
વિધાય માતૃકા ન્યાસં અઙ્ગન્યાસ પુરસ્સરમ્ ॥ ૧૬૭॥

ભૂતશુદ્ધિ સમોપેતં શૃઙ્ખલા ન્યાસમાચરેત્ ।
યથાવદાશાસમ્બદ્ધઃ સાધકઃ પ્રીતિ સંયુતઃ ॥ ૧૬૮॥

મૂલમન્ત્રં જપેદ્ધીમાન્ પરયા સંયુતોધિયા ।
પ્રણવં પૂર્વમુદ્ધૃત્ય રમાબીજમનુસ્મરન્ ॥ ૧૬૯॥

માયા કામૌ સમુચ્ચાર્ય પુનર્જાયાં વિભાવસોઃ ।
બધ્નન્તિયે મહારક્ષાં બાલાનાં ચ વિશેષતઃ ॥ ૧૭૦॥

ભવન્તિ નૃપ પૂજ્યાસ્તે કીર્તિભાજો યશસ્વિનઃ ।
શત્રુતો ન ભયંતેષાં દુર્જનેભ્યો ન રાજતઃ ॥ ૧૭૧॥

ન ચ રોગો ન વૈ દુઃખ ન દારિદ્ર્યં ન દુર્ગતિઃ ।
મહાર્ણવે મહાનદ્યાં સ્થિતેઽપિ ચ નભીઃ ક્વચિત્ ॥ ૧૭૨॥

રણે દ્યુતે વિવાદે ચ વિજયં પ્રાપ્નુવન્તિ તે ।
નૃપાશ્ચ વશ્યતાં યાન્તિ નૃપમાન્યાશ્ચ યે નરાઃ ॥ ૧૭૩॥

સર્વત્ર પૂજિતા લોકે બહુમાનપુરસ્સરાઃ ।
રતિરાગવિવૃદ્ધાશ્ચ વિહ્વલાઃ કામપીડિતાઃ ॥ ૧૭૪॥

યૌવનાક્રાન્તદેહા સ્તાઃ શ્રયન્તે વામલોચનાઃ ।
લિખિતં મૂર્ધ્નિકણ્ઠે વા ધારયેદ્યો રણે શુચિઃ ॥ ૧૭૫॥

શતધાયુધ્યમાનં તુ પ્રતિયોદ્ધા ન પશ્યતિ ।
કેતૌ વા દુન્દુભૌ યેષાં નિબદ્ધં લિખિતં રણે ॥ ૧૭૬॥

મહાસૈન્યે પરિત્રસ્તાન્કાન્દિશીકાન્હતૌજસઃ ।
વિચેતનાન્વિમૂઢાંશ્ચ શત્રુકૃત્યવિવર્જિતાન્ ॥ ૧૭૭॥

નિર્જિત્ય શત્રુસઙ્ઘાસ્તે લભન્તે વિજયં ધ્રુવમ્ ।
નાભિચારો ને શાપશ્ચ બાણવીરાદિકીલનમ્ ॥ ૧૭૮॥

ડાકિની પૂતનાકૃત્યા મહામારી ચ શાકિની ।
ભૂતપ્રેત પિશાચાશ્ચ રક્ષાંસિ વ્યન્તરાદયઃ ॥ ૧૭૯॥

ન વિશન્તિ ગૃહે દેહે લિખિતં યત્રતિષ્ઠતિ ।
ન શસ્ત્રાનલતોયૌઘૈર્ભયં તસ્યોપજાયતે ॥ ૧૮૦॥

દુર્વૃત્તાનાં ચ પાપાનાં બલહાનિકરં પરમ્ ।
મન્દુરાકરિશાલાસુ ગવાં ગોષ્ઠે સમાહિતઃ ॥ ૧૮૧॥

પઠેત્તદ્દોષશાન્ત્યર્થં કૂટં કપટનાશિની ।
યમદૂતાન્ન પશ્યન્તિ ન તે નિરયયાતનામ્ ॥ ૧૮૨॥

પ્રાપ્નુવન્ત્યક્ષયં શાન્તં શિવલોકં સનાતનમ્ ।
સર્વબાધા સુઘોરાષુ સર્વદુઃખનિવારણમ્ ॥ ૧૮૩॥

સર્વમઙ્ગલકં સ્વર્ગ્યં પઠિતવ્યં સમાહિતૈઃ ।
શ્રોતવ્યં ચ સદા ભક્ત્યા પરં સ્વસ્ત્યયનં મહત્ ॥ ૧૮૪॥

પુણ્યં સહસ્રનામેદમમ્બાયા રુદ્રભાષિતમ્ ।
ચતુર્વર્ગપ્રદં સત્યં નન્દિકેન પ્રકાશિતમ્ ॥ ૧૮૫॥

નાતઃ પરતરો મન્ત્રો નાતઃ પરતરઃ સ્તવઃ ।
નાતઃ પરતરા વિદ્યા તીર્થં નાતઃ પરાત્પરમ્ ॥ ૧૮૬॥

તેધન્યાઃ કૃતપુણ્યાસ્તે ત એવ ભુવિ પૂજિતાઃ ।

એકવારં મુદા નિત્યં યેઽર્ચયન્તિ મહેશ્વરીમ્ ॥ ૧૮૭॥

દેવતાનાં દેવતાયા બ્રહ્માદ્યૈર્યા ચ પૂજિતા ।
ભૂયાત્સા વરદા લોકે સાધૂનાં વિશ્વમઙ્ગલા ॥ ૧૮૮॥

એતામેવ પુરારાધ્યાં વિદ્યાં ત્રિપુરભૈરવીમ્ ।
ત્રૈલોક્યમોહિનીરૂપામકાર્ષીદ્ભગવાન્હરિઃ ॥ ૧૮૯॥

॥ ઇતિ શ્રીરુદ્રયામલેતન્ત્રે નન્દિકેશ્વરસંવાદે મહાપ્રભાવી
ભવાનીનામસહસ્રસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

*Shri BhavAni Sahasranamastotram*

pdf was typeset on January 10, 2025

Please send corrections to *sanskrit@cheerful.com*